National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 168-170
© 2025 NJHSR
www.sanskritarticle.com

डॉ. लालसिंहपठानिया
प्राचार्य: (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

Correspondence:
डॉ. लालसिंहपठानिया
प्राचार्य: (प्र.),
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः

# बालरामायणप्रसन्नराघवयोः पञ्चावस्थाविमर्शः

**डॉ. लालसिंहपठानिया**

रूपकस्य परमप्रयोजनं फलेनानुरक्तं भवति । यथापूर्वमेव प्रतिपादितं यत् फलमेतत् कथायाः कार्यं जायते, यद्रूपके विशदरूपेण विद्यते । फलमुद्दिश्य क्रियमाणस्य कार्यस्य पञ्चावस्थाः दृग्गोचरी भवन्ति। नाट्यशास्त्रे इमा अवस्थाः कार्यावस्थेति नाम्ना सञ्ज्ञायन्ते । फलार्थिभिः प्रारब्धस्य कार्यस्य पञ्चावस्थाः मताः। यथोक्तं नाट्यशास्त्रे भगवद्भरतमुनिना –

**'संसाध्ये फलयोगे तु व्यापारः साधकस्य।**
**तस्यानुपूर्व्या विज्ञेयाः पञ्चावस्था प्रयोक्तृभिः॥'**
**प्रारम्भश्च प्रयत्नश्च तथा प्राप्तेश्च सम्भवः।**
**नियता च फलप्राप्तिः फलयोगश्च पञ्चमः॥'**[1]

साहित्यदर्पणे दशरूपकेऽपि चेत्थं वर्णनं प्राप्यते -

**'अवस्था पञ्चकार्यस्य प्रारब्धस्य फलार्थिभिः।**
**आरम्भ यत्न प्राप्त्याशा नियताप्तिः फलागमः॥'**[2]

रूपके नायकेन प्रारब्धस्य कार्यस्य अवस्था एव अवस्था शब्देन कथ्यन्ते । आसां पञ्चभेदाः भवन्ति - आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमश्चेति ।

**आरम्भः** - तत्र भूयसे फललाभाय कृतमौत्सुक्यमात्रम् आरम्भः।[3]

**प्रयत्नः** - फलस्याप्राप्तौ तत्प्राप्तये क्रियमाणो व्यापारविशेषः प्रयत्नः। यथोक्तं नाट्यशास्त्रे -

**'अपश्यतः फलप्राप्तिं व्यापारो यः फलं प्रति।**
**परचौत्सुक्यमनं स प्रयत्नः प्रकीर्तितः॥'**[4]

**प्राप्त्याशा** - उपायस्यापायशङ्कायाश्च भावात् तस्य प्राप्तेः सम्भावनैव प्राप्त्याशा । अनया निश्चीयते यदवस्थायामस्यां नायकचरितगतः अन्तर्बाह्यद्वन्द्वः सन्निहितो भवति ।
यथोक्तं नाट्यशास्त्रे -

**'ईषत्प्राप्तिश्च या काचित् अर्थस्य परिकल्प्यते।**
**भावमात्रेण सञ्ज्ञेयैः विधिज्ञैः प्राप्तिसम्भवः॥'**[5]

**नियताप्तिः** - अपायास्याभावात् तस्य निश्चिता प्राप्तिः नियताप्तिः।[6] नाट्यदर्पणानुसारेण उपायानां साफल्यात् कार्यप्राप्तेश्च निर्णयो नियताप्तिः कथ्यते। यथोक्तम् - **'नियताप्तिरूपायानां साकल्यात् कार्यनिर्णयः।'**[7]

**फलागमः** - समग्रफलानां प्राप्तिश्च फलागमः कथ्यते। दशरूपकेऽप्यस्मिन् विषय उक्तम् - 'समग्रफलसम्पतिः फलयोगो यथोदितः॥'[8] नाट्यदर्पणानुसारेण तु नायकस्य साक्षादिष्टार्थप्राप्तिरेव फलागमः।[9] आचार्यभरतेन तु पूर्णरूपेण अभिप्रेतफलप्राप्तिरेव फलयोगः। यथोक्तं नाट्यशास्त्रे -

**'अभिप्रेतं समग्रं च प्रतिरूपं क्रियाफलम्।**

**यद् दृश्येत् निवृत्ते तु फलयोगः स उच्यते॥'**[10]

इमाः खलु पञ्चावस्थाः। बालरामायणे आसां निर्वहणं निम्नप्रकारेण जातम्।

**बालरामायणं पञ्चावस्थाश्च -** यदा कर्पूरचण्डनामधेयो वैतालिको रामस्य यशोगानं विदधति तदैव प्रतिहारी तं निषेधयन् यत् - **'ननुरामदेवेन निषिद्धमात्मोपवर्णनमादशस्थस्वर्गारोहणश्रुतेरादश-कण्ठबन्धम्'**[11] कथनेनानेन कार्यस्य आरम्भाऽवस्था प्रारभते। सन्दर्भेऽस्मिन् फलस्याप्राप्तौ तत्प्राप्तये क्रियमाणो व्यापारविशेषः प्रयत्नो दृग्गोचरी भवति। फलप्राप्तये रामरावणयोर्युद्धस्यायोजनम्, लङ्का-मधिगन्तुं सेतुबन्धनिर्माणम् एवं वर्णनादिकं कथानकम् इमां दिशं प्रति प्रेरयति यतः यत्नावस्थायां फलप्राप्तये सत्त्वरमुद्योगं परिलक्ष्यते। यत्नाऽवस्थेम् अष्टमाङ्कं यावत् प्रचलति। सेतुनिर्माणावसरे देव्याः सीतायाः छिन्नं शिरः समवलोक्य खिन्नमनसो रामस्य कथनम् यत् -

**'देव्याः शिरो मम पुरो यदिदं विलूनं दृष्टं छलाद्दशमुखो यदसौ प्रनष्टः। धिङ्निष्फलं हनुमतः प्लवनं तदब्धौ धिङ्निष्फलः स च ममाचल-सेतुबन्धः॥'**[12]

तथा च -

**रामः-** 'सखे सुग्रीव! वयस्य विभीषण! रावणवधे विहितप्रतिज्ञाः कृताः वयं वत्सेन।'[13] इयमेव प्राप्त्याशायाः चरमसीमा। यत उपायस्या-पायशङ्कायाश्च भावात् तस्य प्राप्तेः सम्भावना प्राप्त्याशा।

**लक्ष्मणः -** 'निर्लूनमप्यार्याशिरः समुल्लपति तत्सविचवर्तिनो भूत्वा श्रृणुयः।'[14] **(सर्वे समुपसर्पन्ति)**

**लक्ष्मणः - कथं स्फूटाक्षरमिदमभिधत्ते।**

**'सूत्रधारचलद्दारुगात्रेयं यन्त्रजानकी।**
**कण्ठस्थ शारिकालापा कृता लङ्केशकेलये॥'**

**'तच्छिरस्थैव निर्माता साचाहं राम शारिका।**
**सच्चरित्रसप्रीत्या त्वां बोधयितुमास्थिता॥'**

**'तेन तेऽग्रेऽभिगीताऽस्याः शिरः खण्डननाटिका।**
**मृता सीतेति येन त्वं गृहान् प्रति निवर्त्तसे॥'**[15]

प्रसङ्गेनानेन नियताप्तेः प्रारम्भो भवन्ति। तदनन्तरं द्विगुणितोत्साहोपेता रामसेना रिपुदलं मर्दयन्ती बभाषे। ततः रामो नवमाङ्के दशकन्धस्य शिरः कर्तयति तत्रैव नियताप्तिः फलागमं समया समायाति।

**'निर्दग्धत्रिपुरेन्धनोऽस्तु गिरिशः क्रौञ्चचलच्छेदने**
**पाण्डित्यं विदितं गुहस्य किमुतावज्ञातयुद्धोत्सवौ।**
**लूत्वा पङ्कजलावमाननवनं चैतस्य लङ्कापते -**
**वीराणां चरितादभूतस्य परमे सरामः स्थितः सीमनि॥'**[16]

यतः अपायस्याभावतः तस्य निश्चिता प्राप्तिर्नियताप्तिः। दशकन्धरस्य देहावसानान्तरं सीता समागमेन राज्याभिषेकेन च साकं फलागमो जायते। इयमेव फलागमाख्या पञ्चमावस्था। यतो हि समग्रफलानां प्राप्तिरेव समागमः कथ्यते।

**प्रसन्नराघवे अवस्थाः तासां भेदाश्च -**

पूर्वमेव प्रतिपादितं यत् फलेनानुरक्तं रूपकस्य परमं प्रयोजनमेव कथानककार्यमिति। फलमुद्दिश्य क्रियमाणस्य कर्मणः पञ्चावस्था एव कार्यावस्था इति नाम्ना सञ्ज्ञायन्ते। रूपके नायकेन प्रारब्धस्य कार्यस्यावस्था एव अवस्थापदेनोच्यते आसां पञ्चभेदाः - आरम्भः, यत्नः, प्रत्याशा, नियताप्तिः, फलागमश्च। यथोक्तं दशरूपके -

**'अवस्थापञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः**
**आरम्भ यत्न प्रत्याशा नियताप्तिः फलागमः॥**[17]

पूर्वप्रकल्पे बहुधा व्याकृतोऽयं विषयः। अत एव प्रसन्नराघवे निर्वहणं निम्नप्रकारेण जातम्।

**आरम्भः -** यत्र भूयसे फललाभाय कृतमौत्सुक्यमात्रम् आरम्भः।[18]

**'प्रायो दुरन्त पर्यन्ता सम्पदोऽपि दुरात्मनाम्।**
**भवन्ति हि सुखोदर्का विपदोऽपिमहात्मनाम्॥'**[19]

ततः सीतापादच्युत नूपुरवृत्तान्तोऽपि दृष्टिपथमवतरति। नूपुरपादाय कोऽपि कपिः ऋष्यमूक सुम्मुखं गतः। गोदावरी-समुद्रयोः वार्त्तालापेन ज्ञायते यत् - **'रामभद्रोऽपि सीताविरहविह्वलः सौमित्रिण धार्यमाणस्तामेव दिशं प्रतस्थे।'**[20] कथनेनानेन कार्यस्यारम्भावस्था प्रारभते। अपि च प्रस्तावनायामपि अनागतकथानिर्देशस्याचार्यै-रादिष्टत्वात् नाटकेऽस्मिन् दयिताऽपहरणं प्रस्तुत्य भाविसीताहरणं, तान् च पुनः प्रत्यावर्त्तयितुं रामस्य महान् प्रयासः सूचितम्।[21]

**यत्नः -** फलस्याप्राप्तौ तत्प्राप्तये क्रियमाणो व्यापारविशेषः प्रयत्नः। यथोक्तं नाट्यशास्त्रे -

**'अपश्यतः फलप्राप्तिं व्यापारो यः फलं प्रति।**
**परश्चौत्सुक्य गमनं स प्रयत्नः प्रकीर्तितः॥'**[22]

**'सहेलं हत्वैनं हरिणमिव हैमं रघुपतिः**
**कपीनां साम्राज्ये प्रणतमभिषिञ्चन् रविसुतम्।**
**अपि ध्वंसात् सख्युर्नृपतिमपचक्रे पलभुजामपि**
**प्रीतं चक्रे निजकुलगरिष्ठं दिनकरम्।।'**[23]

इत्थं रामोपकृतेन सुग्रीवेन सीतान्वेषणाय कुमुदनलनीलाङ्गद-प्रभृतयः कपि भटाः प्रतिदिशं प्रेषिताः। वृत्तान्तोऽयं तुङ्गभद्रामाध्यमेन ज्ञायते। यथा -

**'परिम्लानां मालामिव ललितसौरभ्यरहितामपि**
**स्थाने-स्थाने विचिनुत वधूर्टी दिनमणेः।**
**इति स्वेनोक्ताः कुमुदनलनीलाङ्गदमुखा**
**हनुमत्संयुक्ता दिशि दिशि नियुक्ताः कपि भटाः॥'**[24]

फलप्राप्तये विहितसमुद्रतरणम्, रामरावणयोर्युद्धस्यायोजनम् एवं वर्णनादिकं कथानकं इमां दिशं प्रति प्रेरयति। यतः यत्नावस्थायां फलप्राप्तये सत्त्वरमुद्योगं परिलक्ष्यते। यत्नावस्थेयं सप्ताङ्कं यावत् प्रवहति।

**प्राप्त्याशा -** उपायस्यापायशङ्कायाश्च भावात् तस्य प्राप्तेः सम्भावनैव प्राप्त्याशा। यथा कथितं भरतमुनिना -

**'ईषत्प्राप्तिश्च या काचित् अर्थस्य परिकल्प्यते।**

**भावमात्रेण सञ्ज्ञेयैः विधिज्ञैः प्राप्तिसम्भवः॥'**[25]

षष्ठेऽङ्के सीताविरहविह्वलम् रामं लक्ष्मण ऐन्द्रजालविद्यां द्रष्टुं प्रैरयत् ततः सीतायाः श्रुत्वा रामोऽपि तदद्रष्टुमुत्कण्ठितोऽभूत्। प्रसङ्गेऽस्मिन् रावणः सीतामनुकूलयितुं प्रयस्य सीतयाऽभूदपमानितः। रावणः सीतां हन्तुं गृहीतकरवालोऽभूत्। तद्दृष्ट्वा रामोऽपि व्याकुलोऽजायत् । परञ्च लक्ष्मणः कौशलमैन्द्रजालिकस्योति रामं प्रबोधायत् । यथा -

**लक्ष्मणः-'आर्य! किमिदमैन्द्राजालिकविलोकनादलीकमेव सम्भ्रम्यते।'**[26]

सीतायाः रुधिरं पातुं कपालमिच्छतो रावणस्य हस्ते हनुमता प्रक्षिप्तं अक्षयकुमारशिरः अगात् ।

**रावणः -** कः कोऽत्र भोः ? सत्वरं मम करे कपालपात्रमर्प्यतां येनास्याः कण्ठरुधिरं प्रतीच्छामि। (इत्यशोकविटपान्तरालेहस्तं प्रसार्य) कथं न्यस्तमेव केनापि मम करतले कपालम्। (विलोक्य) (सचमत्कारम) अये न कपालमेतत्, किन्त्वशस्त्रछिन्नं शिर एव कस्यापि (विमृश्य) कस्य पुनरिदम् ? नूनमक्षकुमारस्य (इति मूर्च्छितः पतति) ।[27] इत्थम् उपायस्यापाय शङ्कायाश्च भावात् तस्य प्राप्तेः सम्भावना प्राप्त्याशा ।

**नियताप्तिः -** उपायानां साफल्यात् कार्यप्राप्तेश्च निर्णयो नियताप्तिः कथ्यते। नाट्यदर्पणेऽपि उक्तम् - **'नियतप्राप्तिरूपायानां साफल्यात् कार्यनिर्णयः।'**[28]

सप्तमेऽङ्के रावणः कुम्भकर्णं रामेण सह, मेघनादञ्च लक्षणेन साकं योद्धमादिशदिति ।

**'रामेण सार्धमयमुद्धत बाहुदर्पः सङ्ग्रामभूमिमधितिष्ठति कुम्भकर्णः।**
**रक्षः शिखण्डि हृदयोत्सव मेघनादः सौमित्रिणा सममसावपि मेघनादः ॥'**[29]

कञ्चन कालानन्तरं मेघनादकुम्भकर्णयोर्वधवृत्तान्तं श्रुत्वा रावणो मन्दोदर्या सार्ध मूर्च्छितो भवति । यथा –

**नेपथ्ये -** यद्दंष्ट्रवज्रघातैः समीति विदलिताः शैलकल्पाः कपीन्द्राः यन्नाराचाम्बुर्षैर्दवदहनसमाः शामिता वानरेन्द्राः। वीरोऽसौ कुम्भकर्णः, स च समरकला कौतुकी मेघनादः सञ्जातौ -

रावणः - किमतः परं वदिष्यति ?

(पुनर्नेपथ्ये)

'हा ! पतङ्गौ यदशरथसुतयोर्दारुणे बाणवह्नौ।'

प्रसङ्गेनानेन नियताप्तेः प्रारम्भो भवति। तदनन्तरं द्विगुणि-तोत्साहोपेता रामसेना रिपुदलं मर्दयन्ती बभाषे तथा च रामनाराचैः दशकन्धरः क्षितौ न्यपतत्। वृत्तमेतद् विद्याधरी-विद्याधरयोः वार्त्तालापेन सङ्गच्छते । प्रसन्नराघवे वर्णितमस्ति -

**'विकचकुसुमस्तोमाकीर्णे परागविभूषितः**
**शशिमणि शिलातल्पेऽनल्पे सलीलमशेत यः।**
**अयमयमयौ रोषारूढे क्षणं रघुनन्दने**
**भुवि दशमुखः शेते धूलिच्छटाधूसरः॥'**[30]

प्रथमाङ्क एव रावणस्य कथनं यत् यथा पूर्वं शिवार्चने मच्छिन्नानि शिरांसि मङ्गलायाभवन्, तथैव रणेऽपि छिद्यमानानि परमकल्याणाय भविष्यन्ति ।[31] एतेन भाविशिरच्छेदनं सूचितं वर्त्तत एव। इत्थं नियताप्तिः फलागमं समया समायाति। यतो हि अपायस्याभावतः तस्य निश्चिता प्राप्तिः नित्याप्तिः।

**फलागमः -** नायकस्य साक्षादिष्टार्थ प्राप्तिरेव फलागमः।[32] दशशिरोधरस्य प्रतिनायकस्य यदेहावसानान्तरं सीतारामसमागमेन फलागमः जायते। इयमेव फलागमाख्या पञ्चमावस्था। यतो हि समग्रफलानां प्राप्तिरेव समागमः कथ्यते। इति। अत्र बालरामायणप्रसन्नराघवयोः पञ्चावस्थाविमर्शः सङ्क्षेपेण प्रतिपादितः।

**पाद टिप्पणी:**

1 नाट्यशास्त्रम्, 21.7
2 साहित्यदर्पणम्, 6.70.71, दशरूपकम्, 1.19
3 औत्सुक्यमात्रबन्धस्तु, यद्बीजस्य निबध्यते । नाट्यशास्त्रम्, 19.7-8
महतः फलयोगस्य स खल्वारम्भ इष्यते । नाट्यशास्त्रम्, 21.10
भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्ध्ये । साहित्यदर्पणम्, 6.71
4 नाट्यशास्त्रम्, 21.11
5 नाट्यशास्त्रम्, 21.12
6 अपायभावतः प्राप्तिर्नियताप्तिः सुनिश्चिता । साहित्यदर्पणम्, 6.73
7 नाट्यदर्पणम्, पृष्ठसङ्ख्या - 46
8 दशरूपकम्, 1.22 साहित्यदर्पणम्, 6.73
9 साक्षादिष्टार्थसम्भूतिर्नायिकस्य फलागमः । नाट्यदर्पणम्, पृष्ठसङ्ख्या – 46
10 नाट्यशास्त्रम्, 21.14
11 बालरामायणम्, सप्तमाङ्कः, पृष्ठसङ्ख्या - 218)
12 बालरामायणम्, 7.75
13 बालरामायणम्, सप्तमाङ्कः, पृष्ठसङ्ख्या - 248
14 बालरामायणम्, सप्तमाङ्कः, पृष्ठसङ्ख्या - 249
15 बालरामायणम्, 7.77-79
16 बालरामायणम्, 9.57
17 दशरूपके 1.19
18 'भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ।' साहित्यदर्पणे 6.71
19 प्रसन्नराघवम्, 5.49
20 प्रसन्नराघवम्, पृष्ठसङ्ख्या - 340 (गद्य भागः)
21 प्रसन्नराघवम्,1.6
22 नाट्यशास्त्रम्, 21.11
23 प्रसन्नराघवम्, 5.50
24 प्रसन्नराघवम्, 5.11
25 नाट्यशास्त्रम्, 21.12
26 प्रसन्नराघवम्, पृष्ठसङ्ख्या - 384 (गद्यभागः)
27 प्रसन्नराघवम्, पृष्ठसङ्ख्या - 388 तमे पृष्ठे (गद्यभागः)
28 नाट्यदर्पणम्, पृष्ठसङ्ख्या - 46
29 प्रसन्नराघवम्, 7.23
30 प्रसन्नराघवम्, 7.52
31 प्रसन्नराघवम्, 1.44
32 साक्षादिष्टार्थसम्भूतिर्नायकस्य फलागमः । नाट्यदर्पणम्, पृष्ठसङ्ख्या - 46